# DhuNDhirAjabhujangaprayAtastotram

# ઢુણ્ઢિરાજભુજંગપ્રયાતસ્તોત્રમ્

## Document Information

Text title : DhuNDhirAjabhujangaprayAtastotra

File name : DhuNDhirAjabhujangaprayAtastotra.itx

Category : ganesha, bhujanga, aShTaka

Location : doc_ganesha

Author : DhuNDhirAja

Transliterated by : Available at webdunia.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : April 23, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2025

*sanskritdocuments.org*

# ઢુણ્ઢિરાજભુજંગપ્રયાતસ્તોત્રમ્

ઉમાઙ્ગોદ્ભવં દન્તિવક્ત્રં ગણેશં ભજે કઙ્કણૈઃ શોભિતં ધૂમ્રકેતુમ્ ।
ગલે હારમુક્તાવલીશોભિતં તં નમો જ્ઞાનરૂપં ગણેશં નમસ્તે ॥ ૧॥

ગણેશૈકદન્તં શુભં સર્વકાર્યે સ્મરન્ મન્મુખં જ્ઞાનદં સર્વસિદ્ધિમ્ ।
મનશ્ચિન્તિતં કાર્યસિદ્ધિર્ભવેત્તં નમો બુદ્ધિકલ્પં ગણેશં નમસ્તે ॥ ૨॥

કુઠારં ધરન્તં કૃતં વિઘ્નરાજં ચતુર્ભિર્મખૈરેકદન્તૈકવર્ણમ્ ।
ઇદં દેવરૂપં ગણં સિદ્ધિનાથં નમો ભાલચન્દ્રં ગણેશં નમસ્તે ॥ ૩॥

શિરઃસિન્દુરં કુઙ્કુમં દેહવર્ણં શુભૈભાદિકં પ્રીયતે વિઘ્નરાજમ્ ।
મહાસઙ્કટચ્છેદને ધૂમ્રકેતું નમો ગૌરિપુત્રં ગણેશં નમસ્તે ॥ ૪॥

તથા પાતકં છેદિતું વિષ્ણુનામં તથા ધ્યાયતાં શંકરં પાપનાશમ્ ।
યથા પૂજિતં ષણ્મુખં શોકનાશં નમો વિઘ્નનાશં ગણેશં નમસ્તે ॥ ૫॥

સદા સર્વદા ધ્યાયતામેકદન્તં સદા પૂજિતં સિન્દુરારક્તપુષ્પૈઃ ।
સદા ચર્ચિતં ચન્દનૈઃ કુઙ્કુમાક્તં નમો જ્ઞાનરૂપં ગણેશં નમસ્તે ॥ ૬॥

નમો ગૌરિદેહ-મલોત્પન્ન તુભ્યં નમો જ્ઞાનરૂપં નમઃ સિદ્ધિપં તમ્ ।
નમો ધ્યાયતામર્ચતાં બુદ્ધિદં તં નમો ગૌર્યપત્યં ગણેશં નમસ્તે ॥ ૭॥

ભુજઙ્ગપ્રયાતં પઠેદ્ યસ્તુ ભક્ત્યા પ્રભાતે નરસ્તન્મયૈકાગ્રચિત્તઃ ।
ક્ષયં યાન્તિ વિઘ્ના દિશઃ શોભયન્તં નમો જ્ઞાનરૂપં ગણેશં નમસ્તે ॥ ૮॥

॥ ઇતિ શ્રીઢુણ્ઢિરાજભુજઙ્ગપ્રયાતસ્તોત્રં સમ્પૂર્ણમ્ ॥

ઢુણ્ઢિરાજભુજઙ્ગમ્

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*DhuNDhirAjabhujangaprayAtastotram*

pdf was typeset on May 10, 2025

Please send corrections to *sanskrit@cheerful.com*